दर्व्वीपाकसुवर्णरत्नघटिका दक्षे करे संस्थिता
वामे चारुपयोधरी रसभरी सौभाग्यमाहेश्वरी ।
भक्ताभीष्टकरी फलप्रदकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥९॥
सर्व्वत्राणकरी महाभयहरी माता कृपासागरी
दाक्षानन्दकरी निरामयकरी विश्वेश्वरी श्रीधरी ।
साक्षान्मोक्षकरी सदाशिवकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी ॥१०॥
अन्नपूर्णे सदा पूर्णे शङ्करप्राणवल्लभे ।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि नमोऽस्तु ते ॥११॥
इति श्रीशङ्कराचार्य्यविरचितमन्नपूर्णास्तोत्रं समाप्तं ॥ क्वचित् पुस्तके शङ्कराचार्य्यस्थाने वेदव्यास इति पाठः ॥

अन्नप्राशनं, क्ली, (अन्नस्य प्राशनं भोजनं यस्मिन् तत् । अन्न+प्र+अश+भावे ल्युट् ।) षष्ठे मासि अष्टमे वा बालकस्य पञ्चमे मासि सप्तमे वा बालिकायाः प्रथमान्नभक्षणरूपसंस्कारः । इति स्मृतिः ॥ तस्य क्रमः । शोभनदिने कृतस्नानः कृतवृद्धिश्राद्धः पिता शुचिनामानमग्निं संस्थाप्य विरूपाक्षजपान्तां कुशण्डिकां समाप्य प्रकृतकर्म्मारम्भे प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा महाव्याहृतिहोमं कुर्य्यात् । ततः आज्येन तत्तन्मन्त्रैः पञ्चाहुतीर्जुहुयात् । ततः पञ्चप्राणानां होमः । ततो महाव्याहृतिहोमं कृत्वा प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा प्रकृतं कर्म्म समाप्य उदीच्यं शाट्यायनहोमादिवामदेव्यगानान्तं कर्म्म निर्व्वर्त्य मन्त्रेण कुमारस्य मुखे अन्नं दद्यात् । ततः कर्म्मकारयितृब्राह्मणाय दक्षिणां दद्यात् । इति भवदेवभट्टः ॥ तस्य विहितदिनादि यथा,—

"ततोऽन्नप्राशनं षष्ठे मासि कार्य्यं यथाविधि ।
अष्टमे वाथ कर्त्तव्यं यद्वेष्टं मङ्गलं कुले" ॥

षष्ठ इति मुख्यः कल्पः प्राशुक्तन्यायात् । कृत्यचिन्तामणौ ।

"अन्नस्य प्राशनं कार्य्यं मासि षष्ठेऽष्टमे बुधैः ।
स्त्रीणान्तु पञ्चमे मासि सप्तमे प्रजगौ मुनिः ॥
द्वादशीलग्नसीनन्दारिक्तासु पञ्चपर्व्वसु ।
बलमायुर्यशो हन्यात् शिशूनामन्नभक्षणं" ॥

मुजबलभीमे ।

"षष्ठे मासि निशाकरे शुभकरे रिक्तेतरे वा तिथौ
सौम्यादित्यसितेन्दुजीवदिवसे पक्षे च कृष्णेतरे ।
प्राजेशादिति पौष्णवैष्णवयुगैर्हस्तादिषट्कोत्तरैराग्नेयाप्पतिपित्र्यभैश्च नितरामन्नादिभक्षं शुभं" ॥

युगैरिति प्राजेशादौ प्रत्येकं सम्बध्यते । तथाचापि तिथ्यादिविडम्बक्षं विवर्ज्जयेत् ।

"वृषद्वन्द्वधनुर्म्मीनकन्यालग्नेऽन्नभक्षणं ।
त्रिकोणाष्टकयूकान्त्यग्रहा यद्वत्तयाक्षणं ॥
दुष्टः शशधरो लग्नात् षष्ठाष्टस्थोऽन्नभक्षणे" ।

मार्कण्डेयः ।

"देवता पुरतस्तस्य पितुरङ्कगतस्य च ।
अलङ्कृतस्य दातव्यमन्नं पात्रे च काञ्चने ॥
मध्वाज्यकनकोपेतं प्राशयेत् पायसं ततः ।
कृतप्राशनमुत्सङ्गे मातुर्ब्बालन्तु तं न्यसेत् ॥
देवाग्रतोऽथ विन्यस्य शिल्पभाण्डानि सर्व्वशः ।
शास्त्राणि चैव शस्त्राणि ततः पश्येत्तु लक्षणं ॥
प्रथमं यत् स्पृशेद्बालः शिल्पभाण्डं स्वयं तथा ।
जीविका तस्य बालस्य तेनैव तु भविष्यति" ॥

इति ज्योतिस्तत्त्वं ॥

अन्नमयकोषः, पुं, (अन्नस्य विकारः अन्न+विकारार्थे मयट् । "आनन्दमयोऽभ्यासादिति" शारीरकसूत्रे भाष्यकारेणोक्तम् ।) स्थूलशरीरं । इति वेदान्तसारः ॥

अन्नमलं, क्ली, (अन्नस्य मलं षष्ठीतत्पुरुषः ।) मद्यं । यथा,—

"सुरा वै मलमन्नानां पुरीषं मलमुच्यते ।
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्" ॥

इति प्रायश्चित्तविवेकः ॥

अन्नविकारः, पुं, (अन्नस्य विकारः षष्ठीतत्पुरुषः ।) शुक्रं । इति राजनिर्घण्टः ॥ (अन्नकृतशोणितमांसादिपरिणामजन्यचरमधातुः । रेतः ।)

अन्नादः, पुं, (अन्नमत्ति भुङ्क्ते अन्न+अद्+अण् । विष्णुरन्नमन्नखादकश्च जगदभिन्नतया, तथाहि श्रुतौ "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रम्य तदैक्षत बहु स्यां प्रजायेय इत्यादि शङ्करभाष्ये । "यदाप्नोति यद्ग्रस्यत्यन्नमन्नाद एव च" ।)
विष्णुः । इति तस्य सहस्रनाममध्ये पठितः ॥
अन्नभोक्तरि त्रि ॥ (परान्नभोजनकारी ।)

अन्यः, त्रि, (अन्+बाहुल्यात् यः ।) असदृशः । इति मेदिनी ॥ परः ।
("चातकतापघ्नरणो जलधरभिन्नो भवे भवेत्कोऽन्यः" । इति नीतिमाला ।

"सोऽयमन्येन वेगादुद्दामेन
द्विरदपतिना सन्निपत्याभियुक्तः" ।

इति उत्तरचरिते ।) तत्पर्य्यायः । भिन्नः । २ अन्यतरः । ३ एकः । ४ त्वः । ५ इतरः ६ । इत्यमरः ॥ विलक्षणः । ७ । इति जटाधरः ॥ एकतरः ८ । नेमः ९ । इति शब्दरत्नावली ॥

अन्यत्, व्य, (अन्+बाहुल्यात् यत् ।) इतरं । भिन्नं । यथा देवदत्त आयातोऽन्यद्यज्ञदत्तः ।
"अन्यदेवास्य गाम्भीर्य्यमन्यद्धैर्य्यं महीयते" ।
इत्यादौ तु क्लीवलिङ्गप्रथमैकवचनान्तान्यशब्दस्वीकारेणाप्युपपत्तिरिति बोध्यं ।

अन्यतः, [स्] व्य, (अन्य+"सर्व्वविभक्तिभ्यस्तसिलिति" तसिल् ।) अन्यत्र । अन्यस्मात् । यथा—

"एकतो हि धिगमूमगुणाढ्यामन्यतः कथमदःप्रतिलम्भः" । इति नैषधं ॥

अन्यतमः, त्रि, (अन्य+डतमच् ।) भिन्नतमः । बहूनां मध्ये निर्द्धारितैकः । इति व्याकरणं ॥ अनेकेर मध्ये एक इति भाषा ।
("एषामन्यतमे स्थाने यः साम्यमन्तं वदेत् ।
आसां महर्षिचर्य्याणां त्यक्त्वान्यतमया तनुम्" ॥
इति मनुः ।) न्यायमते अनेकभेदावच्छिन्नप्रतियोगिताकभेदः ॥

अन्यतरः, त्रि, (अन्य+डतरच् ।) अन्यः । इत्यमरः ॥ भिन्नतरः । द्वयोर्मध्ये निर्द्धारितैकः । इति व्याकरणं ॥ दुयेर मध्ये एक इति भाषा ।
("अधर्म्मेण च यः ... ह यश्चाधर्म्मेण पृच्छति ।
तयोरन्यतरः प्रैति विद्वेषं वाधिगच्छति" ॥
इति मनुः ।) न्यायमते द्वयावच्छिन्नप्रतियोगिताकभेदः ॥

अन्यतरेद्युः, [स्] व्य, (अन्यतरस्मिन् दिवसे निपातनात् एद्युसादेशः ।) अन्यतरदिने । दिनद्वययोरेकतरदिने । इत्यमरः ॥

अन्यत्र, व्य, (अन्यस्मिन्+अन्य+त्रल् ।) वर्ज्जनं । विना । यथा,—
"अन्यत्र निधनात् पत्युः पत्नी केशान्न वापयेद्" ।
इति प्राचीनाः । पत्युर्निधनादन्यत्र पतिमरणं विनेत्यर्थः । स्थानान्तरं । यथा ।

"अन्यत्र यूयं कुसुमावचायं
कुरुध्वमत्रास्मि करोमि सख्यः" ।

इति काव्यप्रकाशः । (कार्य्यान्तरे । क्रियान्तरे ।
"मधुपर्के च यज्ञे च पितृदैवतकर्म्मणि ।
अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः" ॥
इति मनुः ।
विषयान्तरे । शास्त्रान्तरे ।
"योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमं ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" ॥
इति मनुः ।)

अन्यथा, व्य, (अन्येन प्रकारेण अन्य+प्रकारार्थे थाल् ।) परार्थः । मिथ्या । इति मेदिनी ॥ दुष्टं । इति शब्दरत्नावली ॥ अन्यप्रकारं । इति व्याकरणं ॥
("स्वभावो नोपदेशेन शक्यते कर्त्तुमन्यथा" ।
इति पञ्चतन्त्रं । अन्यायेन । शास्त्रविरोधेन । अयथायथम् ।
"अमात्याः प्राड्विवाको वा यत्कुर्य्युः कार्य्यमन्यथा ।
तत् स्वयं नृपतिः कुर्य्यात् तान् सहस्रञ्च दण्डयेत्" ॥
इति मनुः ।)

अन्यथासिद्धिः, स्त्री, (अन्यथा अन्यप्रकारेण सिद्धिः ।) कार्य्याव्यवहितपूर्व्ववर्त्तित्वे सति कार्य्यानुत्पादकत्वं । सा पञ्चविधा । यथा । यत्कार्य्यं प्रति कारणस्य पूर्व्ववर्त्तिता येन रूपेण गृह्यते तत्कार्य्यं प्रति तद्रूपमन्यथासिद्धं । यथा घटं प्रति दण्डत्वं ॥ १ ॥ यस्य स्वातन्त्र्येण अन्वयव्यतिरेकौ न स्तः किन्तु कारणमादायान्वयव्यतिरेकौ तदन्यथासिद्धं । यथा घटं प्रति दण्डरूपं ॥ २ ॥ अन्यं प्रति पूर्व्ववर्त्तितां गृहीत्वैव यस्य यत्कार्य्यं प्रति पूर्व्ववर्त्तित्वं गृह्यते तस्य तत्कार्य्यं प्रति अन्यथासिद्धत्वं । यथा घटादिकं प्रति आकाशस्य ॥ ३ ॥ यत्कार्य्यजनकं प्रति पूर्व्ववर्त्तित्वं गृहीत्वैव यस्य यत्कार्य्यं प्रति पूर्व्ववर्त्तित्वं गृह्यते तस्य तत्कार्य्यं प्रति अन्यथासिद्धत्वं । यथा कुलालपितुर्घटं प्रति ॥ ४ ॥ अवश्यक्लृप्तनियतपूर्व्ववर्त्तिन एव कारणत्वसम्भवे तद्भिन्नमन्यथासिद्धं । यथा घटं प्रति रासभादिः ॥ ५ ॥ इति सिद्धान्तमुक्तावली ॥